A

Series : **A**

# 4422

# SANSKRIT

| प्रश्न–पुस्तिका क्रम संख्या Question Booklet No. |
|---|
| **2072449** |

अनुक्रमांक Roll No. ☐☐☐☐☐☐ ← परीक्षार्थी अपना अनुक्रमांक दिए गए खानों में लिखें। Candidate should write his/her Roll No. in the given boxes.

मुद्रित पृष्ठों की संख्या/No. of Printed Pages : 24 | कुल प्रश्नों की संख्या/Total No. of Questions : 150

समय/Time : 3 घण्टे/Hours | पूर्णांक/Total Marks : 600

## परीक्षार्थियों के लिए निर्देश

1. परीक्षा प्रारम्भ होने के तुरन्त बाद, आप इस प्रश्न–पुस्तिका की पड़ताल अवश्य कर लें, कि इसमें कोई बिना छपा, फटा या छूटा हुआ पृष्ठ अथवा प्रश्नांश, आदि न हो । यदि ऐसा है, तो वीक्षक से तत्काल संपर्क कर प्रश्न–पुस्तिका बदल लेवें।
2. इस प्रश्न पुस्तिका में **संस्कृत** से संबंधित कुल **150** प्रश्न हैं । **सभी** प्रश्न अनिवार्य हैं ।
3. प्रदत्त उत्तर–पत्र (ओ.एम.आर. शीट) पर दिए गए निर्देशों को ध्यानपूर्वक पढ़ें तथा अपने उत्तर तदनुसार अंकित करें।
4. कृपया उत्तर–पत्र (ओ.एम.आर. शीट) पर निर्धारित स्थानों पर आवश्यक प्रविष्टियाँ करें, अन्यत्र स्थानों पर नहीं।
5. परीक्षार्थी सभी रफ़ कार्य प्रश्न–पुस्तिका के अंतिम पृष्ठों पर निर्धारित स्थान पर ही करें, अन्यत्र कहीं नहीं तथा उत्तर–पत्र (ओ.एम.आर. शीट) पर भी नहीं।

## INSTRUCTIONS TO THE CANDIDATES

1. Immediately after the commencement of the examination, you should check that this Question Booklet does not have any unprinted or torn or missing pages or items etc. If so, immediately contact the Invigilator and get it replaced with another Question Booklet.
2. This Question Booklet contains Total **150** questions of concerned **Sanskrit** subject. **All** questions are compulsory.
3. Read carefully the instructions given on the Answer Sheet (OMR) supplied and indicate your answers accordingly.
4. Kindly make necessary entries on the Answer Sheet (OMR) at the places indicated and nowhere else.
5. Examinee should do all rough work on the space meant for rough work on pages given at the end of the Question Booklet and nowhere else, not even on the Answer Sheet (OMR).

SEAL

# द्वितीय प्रश्न–पत्र
## संस्कृत

1. समाजे परित्यक्तायाः अनाथबालिकायाः कथा कविना इक्षुगन्धायां केन नाम्ना वर्णिता ?
   (A) जिजीविषा
   (B) अनामिका
   (C) शतपर्विका
   (D) एकहायनी

2. इक्षुगन्धा इति कथासंकलनायां रामलालस्य तस्य सप्त कन्यकानाञ्च वर्णनं कस्याः कथायाः प्रतिपाद्यम् अस्ति ?
   (A) भग्नपञ्जरः
   (B) ताम्बूलकरङ्कवाहिनी
   (C) शतपर्विका
   (D) जिजीविषा

3. भावमाला इति काव्यस्य प्रणेतुः नाम किमस्ति ?
   (A) श्रीनिवासरथः
   (B) रमाकान्तपाण्डेयः
   (C) त्रिपाठीमिथिलाप्रसादः
   (D) त्रिपाठी राधावल्लभः

4. भावमालायां कविः कां भाषां विना भारतीयभाषाः पूर्णाः नैव इति वदति ?
   (A) देवभाषाम्
   (B) हिन्दीभाषाम्
   (C) तमिलभाषाम्
   (D) मराठीभाषाम्

5. भावमाला इति काव्यस्य मुख्यप्रतिपाद्यं किं वर्तते ?
   (A) भावरक्षणम्
   (B) संस्कृतरक्षणम्
   (C) संस्कृतिरक्षणम्
   (D) कन्यारक्षणम्

6. नायकः इत्यस्मिन् प्रयोगे कः आदेशः ?
   (A) वृद्धिः
   (B) गुणः
   (C) आयू
   (D) पररूपम्

7. अधोलिखितानां युग्मानां समुचितं मेलनं किम् ?

| | | |
|---|---|---|
| a. | अव्ययीभाव: | 1. उभयपदार्थप्रधान: |
| b. | बहुव्रीहि: | 2. उत्तरपदार्थप्रधान: |
| c. | तत्पुरुष: | 3. अन्यपदार्थप्रधान: |
| d. | द्वन्द्व: | 4. पूर्वपदार्थप्रधान: |

(A) a – 2, b – 1, c – 4, d – 3

(B) a – 3, b – 4, c – 2, d – 1

(C) a – 4, b – 3, c – 2, d – 1

(D) a – 4, b –1, c – 3, d – 2

8. वैनतेय: इति प्रयोगे क: प्रत्यय: ?

(A) ष्यत्

(B) यत्

(C) ढक्

(D) अण्

9. रात्री इत्यत्र पदे ङीष् प्रत्यय: केन सूत्रेण कृत: ?

(A) बह्वादिभ्यश्च

(B) कृदिकारादक्तिन:

(C) वोतो गुणवचनात्

(D) षिद्गौरादिभ्यश्च

10. अभिनिविशश्च इति सूत्रं विदधाति ?

(A) कर्तृसंज्ञाम्

(B) कर्मसंज्ञाम्

(C) करणसंज्ञाम्

(D) अधिकरणसंज्ञाम्

11. नाकरिष्यद्यदि ब्रह्मा लिखितं चक्षुरुत्तमम्।
तत्रेयमस्य लोकस्य नाभविष्यच्छुभा गति:।।
लेखनकलोत्पत्तिविषये पद्यैतद् प्राप्यते

(A) अत्रिस्मृतौ

(B) वाराहस्मृतौ

(C) मनुस्मृतौ

(D) नारदस्मृतौ

12. 'ब्राह्मी' लिप्या: उल्लेख: न प्राप्यते

(A) समवायाङ्गसूत्रे

(B) समराङ्गणसूत्रे

(C) ललितविस्तरे

(D) भगवतीसूत्रे

13. कलिङ्गाधिपति: श्रीखारवेल: कस्य शास्त्रस्य ज्ञाता आसीत् ?

(A) धनुर्वेदस्य

(B) आयुर्वेदस्य

(C) गन्धर्ववेदस्य

(D) नृवंशशास्त्रस्य

14. गिरिनाराभिलेखे वर्णितस्य जलाशयस्य नाम किमस्ति ?

(A) सुलोचनम्

(B) सुपरिमितम्

(C) सुशोभनम्

(D) सुदर्शनम्

15. 'हिद भगवं जाते ति'- 'रुम्मिनदेई' स्तम्भलेखोत्कीर्णा उक्तिरियं सम्बद्धाऽस्ति

(A) महावीरेण

(B) पार्श्वनाथेन

(C) बुद्धेन

(D) असितेन

16. वेदरचनाया अदितिकाल: क: ?

(A) 4000 – 2500

(B) 2500 – 1400

(C) 6000 – 4000

(D) 1400 – 500

17. 'व्यश्नुवाते सर्वम्' इति निर्वचनं कस्या देवताया: ?

(A) अग्ने:

(B) अश्विनो:

(C) वरुणस्य

(D) इन्द्रस्य

18. 'ऋतावरी' इति केन सम्बद्धम् ?

(A) उषसा

(B) वागम्भृण्या

(C) पृथिव्या

(D) नद्या

19. 'मृगोन भीम: कुचरो गिरिष्ठा:' इति मन्त्रांश: केन संबद्ध: ?

(A) वरुणेन

(B) रुद्रेण

(C) हिरण्यगर्भेण

(D) सूर्येण

20. सरमापणि संवादसूक्तस्य क्रमो वर्तते

(A) 10.107

(B) 10.108

(C) 10.95

(D) 10.125

21. अन्तर्धौ येनादर्शनमिच्छति इति सूत्रेण सिध्यति

(A) मातरि निलीयते कृष्ण:

(B) मात्रा निलीयते कृष्ण:

(C) मात्रे निलीयते कृष्ण:

(D) मातुर्निलीयते कृष्ण:

22. कारकेषु करणं किं भवति ?

(A) साधनतमं

(B) साधकतमं

(C) साध्यतमं

(D) उपर्युक्तेषु न किमपि

23. अर्थविकासस्य दिशासु किं समीचीनं नास्ति ?

(A) अर्थविस्तार:

(B) अर्थापत्ति:

(C) अर्थसंकोच:

(D) अर्थादेश:

24. का भाषा केन्तुम् वर्गस्य नास्ति ?

(A) संस्कृत भाषा

(B) लातिन भाषा

(C) जर्मनिक भाषा

(D) ग्रीक भाषा

25. अर्थानुसारं वाक्यस्य कति भेदा: ?

(A) षट्

(B) त्रय:

(C) अष्ट

(D) चत्वार:

26. मीराचरितकाव्ये मीरायाः जन्मनगर्या: नाम किं कथितम् ?

(A) वाराणसी

(B) उज्जयिनी

(C) बांबोली

(D) कुर्खी

27. विवेकानन्दविजयनाटके कति अङ्का: सन्ति ?

(A) षट्

(B) दश

(C) नव

(D) सप्त

28. विवेकानन्दविजयनाटकस्य कस्मिन् अङ्के श्रीरामकृष्ण दर्शनम् वर्णितम् ?

(A) दशमे

(B) तृतीये

(C) चतुर्थे

(D) पञ्चमे

29. शश्वत् कल्याणवर्षं वितरतु दशकं धर्मसल्लक्षणानाम् इति कस्य कामना वर्णिता ?

(A) विवेकानन्दस्य

(B) श्रीरामकृष्णपरमहंसस्य

(C) विश्वनाथस्य

(D) रहमानस्य

30. अभिराज राजेन्द्रमिश्रप्रणीता इक्षुगन्धा इति कथानिकासङ्कलनायां कति कथा: सन्ति ?

(A) षट्

(B) अष्ट

(C) दश

(D) सप्त

31. अधोलिखित युग्मानां समीचीनं मेलनं कुरुत।

| | |
|---|---|
| a. अनुशासनपर्वम् | 1. नलोपाख्यानम् |
| b. भीष्मपर्वम् | 2. भीष्मस्य स्वर्गगमनम् |
| c. आदिपर्वम् | 3. गीतोपदेश: |
| d. अरण्यपर्वम् | 4. लाक्षागृहवृत्तम् |

(A) a – 3, b – 2, c – 1, d – 4

(B) a – 1, b – 4, c – 3, d – 2

(C) a – 3, b – 4, c – 1, d – 2

(D) a – 2, b – 3, c – 4, d – 1

32. 'पुराण' पदलक्षणे किं सम्मिलितं नास्ति ?

(A) सर्ग:

(B) प्रतिसर्ग:

(C) अंशानुचरितम्

(D) वंश:

33. 'भारतीय विद्यानां विश्वकोषम्' – इति रूपेण प्रसिद्धमस्ति

(A) श्रीमद्भागवतपुराणम्

(B) अग्निपुराणम्

(C) विष्णुपुराणम्

(D) पद्मपुराणम्

34. वैष्णवधर्मानुयायिन: कतमं पुराणं 'पञ्चमोवेद:' इति मन्यन्ते ?

(A) वायुपुराणम्

(B) नारदपुराणम्

(C) भागवतपुराणम्

(D) भविष्यपुराणम्

35. प्राचीन भारतीय लिपिषु प्रसिद्धा लिपिरस्ति

(A) खरोष्ठीलिपि:

(B) देवनागरीलिपि:

(C) सामीलिपि:

(D) अरबीलिपि:

36. इन्द्रो जनानां हितस्य करणाद् उच्यते

(A) नर्य:

(B) शतक्रतु:

(C) धृतव्रत:

(D) दमूना:

**37.** अथर्ववेदस्य पृथ्वीसूक्ते कति मन्त्राः सन्ति ?

(A) सप्तपञ्चाशत्

(B) एकसप्ततिः

(C) त्रिषष्टिः

(D) अष्टचत्वारिंशत्

**38.** जैमिनीयसंहिता कस्य वेदस्य शाखा ?

(A) ऋग्वेदस्य

(B) यजुर्वेदस्य

(C) सामवेदस्य

(D) अथर्ववेदस्य

**39.** 'प्रतिष्ठानम्' इति पदस्यार्थो भवति

(A) अर्थवादः

(B) परक्रिया

(C) व्यवधारणम्

(D) उपमानम्

**40.** 'चरणशब्दः शाखाविशेषादययन-परैकतापन्नजनसङ्घवाची' इति चरणस्य लक्षणं केन कृतम् ?

(A) सायणेन

(B) स्कन्दस्वामिना

(C) जगद्धरेण

(D) महीधरेण

**41.** 'सामान्यं वा विशेषो वा तदन्येन समर्थ्यते' अत्र अलंकारः भवति

(A) दृष्टान्तालंकारः

(B) निदर्शनालंकारः

(C) प्रतिवस्तूपमालंकारः

(D) अर्थान्तरन्यासालंकारः

**42.** स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरताऽपि तनुं यस्य शम्भुना न बलं हृतम् ।।
इत्यत्र–अलंकारः अस्ति

(A) अचिन्त्यनिमित्ता विशेषोक्तिः

(B) उक्तनिमित्ता विशेषोक्तिः

(C) अनुक्तनिमित्ता विशेषोक्तिः

(D) विभावना

**43.** आनन्दवर्धनेन कति ध्वनिविरोधिमतानि उल्लिखितानि ?

(A) षड्

(B) अष्ट

(C) चत्वारि

(D) त्रीणि

**44.** 'भाक्तमाहुस्तमन्ये' इति मतम् अस्ति

(A) अभाववादिनाम्

(B) लक्षणावादिनाम्

(C) अलक्षणीयतावादिनाम्

(D) ध्वनिवादिनाम्

45. श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय ।
मा पथिक रात्र्यन्धक शय्यायां मम निर्मक्ष्यसि ।।
इति कस्य ध्वनेः उदाहरणम् अस्ति

(A) वाच्ये विधिरूपे प्रतिषेधरूपध्वनेः

(B) वाच्ये विधिरूपेऽनुभयरूपध्वनेः

(C) वाच्ये प्रतिषेधरूपे विधिरूपध्वनेः

(D) न विधिध्वनेः न प्रतिषेधध्वनेः

46. श्रौतयागस्य पञ्चसु भेदेषु इदं नास्ति

(A) अग्नि होत्रम्

(B) चातुर्मास्यम्

(C) पशुयागः

(D) वाजपेययागः

47. शुनःशेपः केन विक्रीतः ?

(A) हरिश्चन्द्रेण

(B) मधुच्छन्दसा

(C) अजीगर्तेन

(D) देवरातेन

48. 'अमृतत्वस्य तुनाशास्ति वित्तेन' इति वचनं वर्तते

(A) बृहदारण्यकोपनिषदि

(B) कठोपनिषदि

(C) छान्दोग्योपनिषदि

(D) तैत्तिरीयोपनिषदि

49. माण्डूक्योपनिषदि कति वाक्यानि सन्ति ?

(A) चतुर्विंशतिः

(B) द्वादश

(C) पञ्चदश

(D) अष्टादश

50. सामवेदीय तवलकार ब्राह्मणेन संबद्धा उपनिषद् वर्तते

(A) ईशावास्योपनिषद्

(B) केनोपनिषद्

(C) कठोपनिषद्

(D) तैत्तिरीयोपनिषद्

51. मनुस्मृत्यनुसारं पक्षिणः सर्पाः नक्राः मत्स्याः कच्छपादयश्च कस्मिन् वर्गे अन्तर्भवन्ति ?

(A) स्वेदजाः

(B) अण्डजाः

(C) किन्नराः

(D) पशवः

52. मनुस्मृत्यनुसारं यः वेदस्य तु एकदेशं वेदाङ्गानि च वृत्त्यर्थमध्यापयति सः किमिति उच्यते ?

(A) आचार्यः

(B) उपाध्यायः

(C) गुरुः

(D) विप्रः

53. मनुस्मृति इति ग्रन्थे वर्णित: स: क: ? यो सर्वा: प्रजा: शास्ति अभिरक्षति सुप्तेषु जागर्ति च ।

(A) राजा

(B) देव:

(C) दण्ड:

(D) अमात्य:

54. याज्ञवल्क्यानुसारं पित्रोरुर्ध्वं रिक्थमृणं सुता: कथं विभजेरन् ?

(A) ज्येष्ठं श्रेष्ठभागेन

(B) कनिष्ठं कनिष्ठभागेन

(C) यथेच्छया

(D) समम्

55. याज्ञवल्क्यमते धर्मपत्नीज: सुत: क: ?

(A) औरस:

(B) क्षेत्रज:

(C) पुत्रिकासुत:

(D) कानीन:

56. नाट्यशास्त्रे अभिनयस्य कति भेदा: वर्णिता: ?

(A) त्रय:

(B) चत्वार:

(C) पञ्च

(D) षट्

57. दशरूपकरीत्या रूपकस्य भेदं नास्ति

(A) प्रकरणम्

(B) समवकार:

(C) भाण:

(D) रासकम्

58. ________ संस्कृतप्रायो वाग्व्यापारो नटाश्रय:। इत्यत्र रिक्तस्थानपूर्त्यर्थम् उपयुक्तं पदमस्ति।

(A) आरभटी

(B) कैशिकी

(C) भारती

(D) सात्वती

59. धनञ्जयेन 'एको रसोऽङ्गी कर्तव्यो' – इत्यत्र नाटक प्रधानरसत्वेन क: निर्दिष्ट: ?

(A) हास्य:

(B) करुण:

(C) रौद्र:

(D) शृंगार:

60. राजशेखरविरचितं नाट्यं न वर्तते

(A) बालरामायणम्

(B) बालचरितम्

(C) बालभारतम्

(D) विद्धशालभञ्जिका

61. यास्कमतानुसारं ऋचा: कतिविध: सन्ति ?

(A) 03

(B) 04

(C) 06

(D) 05

62. उत्तमपुरुष युक्ताः ऋचः भवन्ति

(A) प्रत्यक्षकृताः

(B) परोक्षकृताः

(C) आध्यात्मिक्यः

(D) आधिभौतिकः

63. अग्निः 'अक्नोपनो भवति' इति निर्वचनं करोति

(A) वार्ष्यायणिः

(B) शाकपूणिः

(C) और्णनाभः

(D) स्थौलाष्ठीविः

64. 'भावप्रधानमाख्यातम्' इत्यत्र भाव शब्दस्य कोऽर्थः ?

(A) द्रव्यम्

(B) क्रिया

(C) कारकः

(D) निपातः

65. 'इन्द्रियनित्यं' इति कस्य मतम् ?

(A) औदुम्बरायणस्य

(B) शाकल्यस्य

(C) आपिशलेः

(D) और्णनाभस्य

66. "नियतिर्विधाय पुंसां प्रथमं सुखमुपरि दारुणं दुःखम्।
कृत्वा लोकं तरला तडिदिव वज्रं निपातयति।।"
हर्षचरितस्य पञ्चमोच्छ्वासे आरम्भे कस्य दारुणदुःखस्य सङ्केतः क्रियते ?

(A) हूणानाम् आक्रमणस्य

(B) महाराजमरणस्य

(C) भगिन्याः मरणस्य

(D) मातुः अपहरणस्य

67. दशकुमारचरितस्य उच्छ्वासानां नामभिः सह सुमेलनं कुरुत ।

1. द्वितीयोच्छ्वासः — a. प्रमतिवर्मचरितम्
2. तृतीयोच्छ्वासः — b. अपहारवर्मचरितम्
3. पञ्चमोच्छ्वासः — c. मन्त्रगुप्तचरितम्
4. सप्तमोच्छ्वासः — d. उपहारवर्मचरितम्

| | 1 | 2 | 3 | 4 |
|---|---|---|---|---|
| (A) | d | b | c | a |
| (B) | b | d | a | c |
| (C) | a | d | b | c |
| (D) | c | d | b | a |

68. "याञ्चा मोघा वरमधिगुणे, नाधमे लब्धकामा ।"
सूक्तिरियं कुत्र लिखिता ?

(A) मेघदूतस्य उत्तरभागे

(B) रघुवंशस्य प्रथमसर्गे

(C) मेघदूतस्य पूर्वभागे

(D) रघुवंशस्य द्वितीयसर्गे

69. बुद्ध चरितस्य कस्मिन् सर्गे सिद्धार्थस्य अभिनिष्क्रमणं वर्णितम् ?

(A) चतुर्थसर्गे

(B) पञ्चमसर्गे

(C) षष्ठसर्गे

(D) सप्तमसर्गे

70. जयदेव विरचितस्य 'गीतगोविन्दस्य' सन्दर्भे समुचितं कथनमस्ति

(A) गीतगोविन्दे 24 सर्गा: सन्ति

(B) प्रथमसर्गस्यारम्भे दशावतार स्तोत्रमस्ति

(C) 'गीतगोविन्दं' संस्कृतस्य प्रसिद्धं खण्डकाव्यमस्ति

(D) इदं काव्यं वीररसप्रधानमस्ति

71. शुद्धाद्वैतवाद–प्रतिपादकोऽस्ति

(A) निम्बार्काचार्य:

(B) वल्लभाचार्य:

(C) रामानुजाचार्य:

(D) शंकराचार्य:

72. 'आत्मा वा अरे द्रष्टव्य:' मन्त्रांशोऽयं कस्यामुपनिषदि वर्तते

(A) ईशावास्योपनिषदि

(B) बृहदारण्यकोपनिषदि

(C) मुण्डकोपनिषदि

(D) प्रश्नोपनिषदि

73. प्रकृतिविकृतय: कति संख्यका: भवन्ति ?

(A) पञ्च

(B) षट्

(C) सप्त

(D) अष्ट

74. कानि कर्माणि अकरणे प्रत्यवाय साधनानि भवन्ति ?

(A) निषिद्धानि

(B) नैमित्तिकानि

(C) काम्यानि

(D) नित्यानि

75. अनुसन्धानात्मिकान्त: करणवृत्ति: किं भवति ?

(A) बुद्धि:

(B) मन:

(C) चित्तम्

(D) अहङ्कार:

76. आचार्यमम्मटानुसारं काव्यस्य हेतुरस्ति

(A) कवित्वबीजरूप: संस्कार विशेष: (शक्ति:)

(B) लोकस्य शास्त्राणां काव्यानां च विमर्शनाद् व्युत्पत्ति: (निपुणता)

(C) काव्यज्ञशिक्षयाभ्यास:

(D) त्रयोऽपि एते समुदिता:

77. आचार्य-अभिनवगुप्तेन स्वीकृतं रससिद्धन्तविषयकं मतम् अस्ति

(A) उत्पत्तिवाद:

(B) अनुमितिवाद:

(C) अभिव्यक्तिवाद:

(D) भुक्तिवाद:

78. आचार्यमम्मटेन मुख्येषु-अष्टसु रसेषु-अपरिगणित: रस:

(A) बीभत्स:

(B) शान्त:

(C) अद्‌भुत:

(D) भयानक:

79. 'असावक्षरादिभिरष्टधा' इति कस्य अलंकारस्य लक्षणे कथितम् ?

(A) अनुप्रास-अलंकारस्य

(B) श्लेषालङ्कारस्य

(C) वक्रोक्ति-अलंकारस्य

(D) उपमा-अलंकारस्य

80. क्वसूर्यप्रभवो वंश: क्व चाल्पविषया मति: ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।।
इत्यत्र-अलंकार: अस्ति

(A) निदर्शना

(B) दृष्टान्त:

(C) उत्प्रेक्षा

(D) अर्थान्तरन्यास:

81. वैदिकछन्दसि अक्षरद्वयस्य अधिका मात्रा कथ्यते ?

(A) निचृत्

(B) भुरिक्

(C) विराट्

(D) स्वराट्

82. शक्वरी छन्दसि अक्षराणि सन्ति

(A) 52

(B) 56

(C) 60

(D) 64

83. ऋक्प्रातिशाख्यानुसारं सन्ध्यक्षरं नास्ति

(A) ए

(B) ओ

(C) ई

(D) ऐ

84. दीर्घतरा स्वरभक्ति: भवति

(A) एकमात्रा कालस्य

(B) अर्द्धमात्रा कालस्य

(C) द्विमात्रा कालस्य

(D) सार्द्धद्वयमात्रा कालस्य

85. ऋक्प्रातिशाख्यानुसारेण अघोष: नास्ति

(A) श

(B) ष

(C) स

(D) ह

86. संस्कृतचन्द्रिका इति प्रसिद्ध पत्रिकाया: सम्पादक: को आसीत् ?

(A) श्रीधरभास्कर वर्णेकर महोदय:

(B) प्रभाकरनारायण कवठेकरमहोदय:

(C) श्रीनिवास रथमहोदय:

(D) अप्पाशास्त्री राशिवडेकर:

87. तुकारामचरितम् इति महाकाव्यस्य प्रणेतु: नाम किम् ?

(A) पण्डिता क्षमादेवी राव

(B) अप्पाशास्त्री राशिवडेकर:

(C) श्रीकृष्णशास्त्री कानिटकर:

(D) उपर्युक्तेषु न कोऽपि

88. अधोलिखितानां कविकाव्यानां सम्यक् मेलनं किम् ?

a. अभिराजराजेन्द्रमिश्र: 1. विवेकानन्दविजयम्

b. अप्पाशास्त्री राशिवडेकर: 2. कथामुक्तावलि:

c. श्रीधरभास्कर वर्णेकर: 3. पञ्जरबद्ध: शुक:

d. पण्डिता क्षमादेवी राव 4. इक्षुगन्धा

(A) a – 2, b – 4, c – 1, d – 3

(B) a – 4, b – 3, c – 1, d – 2

(C) a – 4, b – 1, c – 2, d – 3

(D) a – 3, b – 2, c – 4, d – 1

89. मीराचरितम् इति काव्ये कस्या: वर्णनं विद्यते ?

(A) गोपिकाया:

(B) राधाया:

(C) मीराया:

(D) क्षमाया:

90. यावज्जीवमहं तमेव परया भक्त्या भजे श्रीहरिम् इति उक्ति: कुत्र प्राप्यते ?

(A) मीराचरितकाव्ये

(B) सत्याग्रहगीतायाम्

(C) भावमालायाम्

(D) पञ्जरबद्ध: शुक: इति काव्ये

91. राजशेखरस्य काव्यमीमांसायां प्रकरणानां परिगणनम् अस्ति

(A) 16

(B) 17

(C) 18

(D) 20

92. काव्यमीमांसानुसारं सारस्वतेय: काव्यपुरुष: साहित्यविद्यावधूम् परिणीतवान्

(A) मेकलनगरे

(B) वत्सगुल्मनगरे

(C) मञ्जरनगरे

(D) कुन्तलनगरे

93. काव्यमीमांसानुसारम् इह जन्मन: संस्कार: कारणं यस्यां सा प्रतिमा भवति

(A) सहजा

(B) आहार्या

(C) औपदेशिकी

(D) भावयित्री

94. वक्रोक्तिजीवितकारेण स्वीकृतेषु वक्रोक्ते: भेदेषु नास्ति

(A) वर्णवक्रता

(B) प्रत्ययवक्रता

(C) वाक्यवक्रता

(D) शास्त्रवक्रता

95. 'औचित्यं रससिद्धस्य स्थिरं काव्यस्य जवितम्' इति उद्घोषितम्

(A) अभिनवगुप्तेन

(B) आनन्दवर्धनेन

(C) क्षेमेन्द्रेण

(D) भोजराजेन

96. 'सर्वाणि नामानि आख्यातजानि' इति कस्य मतम् ?

(A) शाकटायनस्य

(B) गार्ग्यस्य

(C) शाकल्यस्य

(D) आपिशले:

97. कात्यायन श्रौतसूत्रम् कति अध्यायेषु विभक्तमस्ति ?

(A) 25

(B) 26

(C) 28

(D) 22

98. निरुक्तस्य 'निरुक्तनिचय' टीकाया: कर्ता क: ?

(A) दुर्गाचार्या:

(B) स्कन्दस्वामी

(C) वररुचि:

(D) वेङ्कटमाधव:

99. पाणिनीय शिक्षानुसारस्य पाठके कति गुणा: सन्ति ?

(A) 04

(B) 03

(C) 05

(D) 06

100. ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्ते इति

(A) औपमन्यव:

(B) गार्ग्य:

(C) शाकल:

(D) शाकटायन:

101. “न विव्यथे तस्य मनो न हि प्रियं,
प्रवक्तुमिच्छन्ति मृषा हितैषिण: ।”
किरातार्जुनीयस्य प्रथमसर्गस्य श्लोकांशेऽस्मिन्
‘तस्य’ पदस्य प्रयोग: कस्य कृते विहित: ?

(A) युधिष्ठिरस्य कृते

(B) वनेचरस्य कृते

(C) दुर्योधनस्य कृते

(D) सुयोधनस्य कृते

102. “हरत्यघं सम्प्रति हेतुरेष्यत:,
शुभस्य पूर्वाचरितै: कृतं शुभै: ।
.................,
व्यनक्ति कालत्रितयेऽपि योग्यताम् ।।”
माघकाव्यस्य प्रथमसर्गस्य श्लोकं पूरयत।

(A) शरीर भाजां भवदीय दर्शनम्

(B) सतीव योषित्प्रकृति: सुनिश्चला

(C) स बाल आसीद् वपुषा चतुर्भुजो

(D) पुराणि दुर्गाणि निशातमायुधम्

103. “प्रतीप भूपैरिव किं ततो भिया,
विरुद्ध धर्मैरपि भेत्तृतो ज्झिता ।
अमित्रजिन्मित्रजिदोजसा,
स यद् विचारदृक् चारदृगप्यवर्तत ।।”
श्रीहर्ष विरचिते श्लोकेऽस्मिन् अङ्गाङ्गिभावो वर्तते

(A) रूपकोत्प्रेक्षयो:

(B) सन्देहोत्प्रेक्षयो:

(C) विरोधोत्प्रेक्षयो:

(D) व्यतिरेकोत्प्रेक्षयो:

104. “राजपुत्रि!, किं ब्रवीमि, वागेव मे नाभिधेयविषयमवतरति त्रपया ।” कादम्बर्या: वाक्यमिदं महाश्वेतां प्रति केनोक्तम् ?

(A) चन्द्रापीडेन

(B) पुण्डरीकेन

(C) कपिञ्जलेन

(D) वैशम्पायेन

105. “क: स महापुरुषो येनै तन्मानुषमात्रदुष्करं महत्कर्मानुष्ठितम् । आगच्छतु । मया सहेमं मत्तहस्तिनमारोहतु ।” दशकुमारचरितस्य एतानि वाक्यानि क: उक्तवान् ?

(A) अपहारवर्मा

(B) राजवाहन:

(C) चण्डवर्मा

(D) सिंह वर्मा

106. स्वस्थवृत्तानुसारं ऋतव: कति ?

(A) तिस्र:

(B) षट्

(C) चतस्र:

(D) दश

107. स्वस्थवृत्ते का: चर्या: वर्णिता: ?

(A) दिनचर्या

(B) ऋतुचर्या

(C) रात्रिचर्या

(D) उपर्युक्ता: सर्वा:

**108.** कौटिलीय–अर्थशास्त्रस्य प्रथमाधिकरणस्य नाम किम् ?

(A) विनयाधिकारिकम्

(B) धर्मस्थीयम्

(C) योगवृत्तम्

(D) षाड्गुण्यम्

**109.** कौटिलीय–अर्थशास्त्रम् इति ग्रन्थानुसारं मुण्डो जटिलो वा वृत्तिकामः गुप्तचरः कः ?

(A) गृहपतिकः

(B) वैदेहकः

(C) कापटिकः

(D) तापसः

**110.** कौटिलीय–अर्थशास्त्रे जनपदनिवेशः दुर्गविधानश्च कस्मिन् अधिकरणे वर्णितम् ?

(A) विनयाधिकारिके

(B) अध्यक्षप्रचारे

(C) व्यसनाधिकारिके

(D) योगवृत्ते

**111.** अतत्त्वतोऽन्यथाप्रथा इति कः कथ्यते ?

(A) विकारः

(B) विवर्तः

(C) विक्षेपः

(D) विरोधः

**112.** तर्कभाषादृशा मनो वर्तते

(A) अणुपरिमाणम्

(B) विभुपरिमाणम्

(C) महत्परिमाणम्

(D) उपर्युक्तेषु न कश्चिद विकल्पः समीचीनः

**113.** श्रोत्रेन्द्रियेण शब्दत्वस्य प्रत्यक्षे कीदृशः सन्निकर्षः भवति ?

(A) समवेत–समवायः

(B) समवायः

(C) संयोगः

(D) विशेषण–विशेष्यभावः

**114.** निश्चित साध्याभाववान् धर्मा कः कथ्यते ?

(A) पक्षः

(B) सपक्षः

(C) हेतुः

(D) विपक्षः

**115.** अधोलिखितेषु किं नास्ति भारतीयदर्शनस्य वैशिष्ट्यम् ?

(A) ब्रह्मस्वरूपचिन्तनम्

(B) तार्किक परीक्षणम्

(C) अर्थसंग्रहणम्

(D) अध्यात्मचिन्तनम्

116. भर्तृहरिमतेन समुचितं सुमेलयत ।

| | | | |
|---|---|---|---|
| 1. | क्षान्तिश्चेद् | a. | राज्येन किम् |
| 2. | ज्ञातिश्चेद् | b. | कवचेन किम् |
| 3. | व्रीडा चेत् | c. | अनलेन किम् |
| 4. | सुकविता यद्यस्ति | d. | किमु भूषणैः |

| | 1 | 2 | 3 | 4 |
|---|---|---|---|---|
| (A) | a | b | c | d |
| (B) | b | c | d | a |
| (C) | c | b | d | a |
| (D) | b | c | a | d |

117. "उदयगिरिगतायां प्राक्प्रभापाण्डुताया–
मनुसरति निशीथे शृंगमस्ताचलस्य ।
जयति किमपि तेजः साम्प्रतं व्योममध्ये,
सलिलमिव विभिन्नं जाह्नवं यामुनञ्च ।।"
त्रिविक्रमस्य प्रसिद्धोऽयं श्लोकः कस्मात् उच्छ्वासात् सङ्कलितः ?

(A) प्रथमोच्छ्वासात्

(B) चतुर्थोच्छ्वासात्

(C) षष्ठोच्छ्वासात्

(D) सप्तमोच्छ्वासात्

118. भोजदेवविरचिते 'रामायण चम्पू' काव्ये 'मधुमय भणितीनां मार्गदर्शी महर्षिः' इत्यनेन कस्य प्रशंसा कृता ?

(A) परशुरामस्य

(B) वाल्मीकेः

(C) वशिष्ठस्य

(D) जनकस्य

119. 'यशस्तिलक चम्पू' काव्ये अन्तिमेषु त्रिषु आश्वासेषु वर्णितमस्ति

(A) यशोधरस्य वृद्धावस्थायाः वर्णनम्

(B) जैनधर्मस्य सामान्योपदेशवर्णनम्

(C) बौद्धधर्मस्य दार्शनिकसिद्धान्त वर्णनम्

(D) यशोधरस्य सुशासनवर्णनम्

120. "एकातपत्रं जगतः प्रभुत्वं,
नवं वयं कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्,
विचारमूढः प्रतिभासि मे त्वम् ।।"
श्लोकेऽस्मिन् 'मे त्वम्' इत्यनयोः प्रयोगः क्रमशः कृतः

(A) दिलीप–सिंहयोः कृते

(B) सुदक्षिणा–दिलीपयोः कृते

(C) सिंह–दिलीपयोः कृते

(D) दिलीप–सुदक्षिणयोः कृते

121. नाटकलक्षणरत्नकोशग्रन्थस्य प्रणेता कोऽस्ति ?

(A) धनंजयः

(B) भरतमुनिः

(C) सागरनंदी

(D) सिंहभूपालः

122. किं युग्मं समीचीनं नास्ति ?

(A) धनञ्जयः - दशरूपकम्

(B) सिंहभूपालः - रसार्णवसुधाकरः

(C) सागरनन्दी - अभिनयदर्पणः

(D) भरतमुनिः - नाट्यशास्त्रम्

123. रामचन्द्रगुणचन्द्रकृते नाट्यदर्पणे कियन्तः विवेकाः सन्ति ?

(A) 3

(B) 4

(C) 5

(D) 6

124. कुशला ये विदग्धाश्च प्रगल्भाश्च जितश्रमाः।
तेष्वयं नाट्यसंज्ञो हि वेदः संक्राम्यतां त्वया।।
नाट्यशास्त्रानुसारं प्रस्तुतश्लोके कथनमस्ति

(A) इन्द्रस्य

(B) देवानाम्

(C) नारदस्य

(D) ब्रह्मणः

125. नाट्यवेदस्य रचनार्थं यजुर्वेदाद् किं जग्राह?

(A) रसान्

(B) अभिनयान्

(C) पाठ्यम्

(D) गीतम्

126. वेदान्तसारेवर्णितम् अज्ञानस्य शक्तिद्वयं किं ?

(A) आवरणम् विक्षेपः

(B) समष्टिः व्यष्टिः

(C) सूक्ष्मं स्थूलम्

(D) अध्यारोपः अपवादः

127. द्वादशीलक्षणी का उच्यते ?

(A) मीमांसा

(B) श्रुतिः

(C) स्मृतिः

(D) उपनिषद्

128. 'तत्त्वार्थसूत्रम्' केन दर्शनेन सम्बद्धम् ?

(A) जैनदर्शनेन

(B) बौद्धदर्शनेन

(C) वैशेषिकदर्शनेन

(D) मीमांसादर्शनेन

129. पञ्चस्कन्धस्यावधारणा कस्मिन् दर्शने प्राप्यते ?

(A) जैनदर्शने

(B) चार्वाकदर्शने

(C) मीमांसादर्शने

(D) बौद्धदर्शने

130. तर्कभाषानुसारं सम्यक् मेलनं किम् ?

| | |
|---|---|
| a. साक्षात्कारिप्रमाकरणं | 1. अनुमानम् |
| b. लिङ्गपरामर्शः | 2. प्रत्यक्षम् |
| c. आप्तवाक्यं | 3. उपमानम् |
| d. विशिष्टपिण्डज्ञानं | 4. शब्दः |

(A) a – 3, b – 1, c – 4, d – 2

(B) a – 2, b – 1, c – 4, d – 3

(C) a – 2, b – 4, c – 3, d – 1

(D) a – 3, b – 4, c – 2, d – 1

131. महाकविभासप्रणीत नाटकविषये सम्यक् मेलनं किम् ?

| | |
|---|---|
| a. महाभारताश्रितं | 1. स्वप्नवासवदत्तम् |
| b. रामायणाश्रितं | 2. बालचरितम् |
| c. लोककथाश्रितं | 3. दूतवाक्यम् |
| d. श्रीकृष्णचरिताश्रितं | 4. प्रतिमानाटकम् |

(A) a – 4, b – 3, c – 2, d – 1

(B) a – 3, b – 2, c – 4, d – 1

(C) a – 4 b – 2, c – 1, d – 3

(D) a – 3, b – 4, c – 1, d – 2

132. वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति।।
इति कथनं कस्याः ?

(A) वासन्त्याः

(B) प्रियंवदायाः

(C) मुग्धायाः

(D) विशोकायाः

133. अभिज्ञानशाकुन्तलानुसारेण सम्यक् मेलनं किमस्ति ?

| | |
|---|---|
| a. प्रथमाङ्के | 1. शकुन्तलायाः हस्तिनापुरे ऋषिभिः सह आगमन् |
| b. चतुर्थाङ्के | 2. राज्ञः सर्वदमनमेलनम् |
| c. पञ्चमाङ्के | 3. शकुन्तलायाः विदावेला |
| d. सप्तमाङ्के | 4. दुष्यन्तस्य कण्वाश्रमे प्रवेशः |

(A) a – 1, b – 4, c – 2, d – 3

(B) a – 3, b – 4, c – 2, d – 1

(C) a – 4, b – 3, c – 1, d – 2

(D) a – 4, b – 1, c – 2, d – 3

134. भवभूतेः रचना नास्ति

(A) उत्तररामचरितम्

(B) कर्पूरमञ्जरी

(C) मालतीमाधवम्

(D) महावीरचरितम्

135. वेणीसंहारनाटकविषये किं सत्यम् ?

(A) षड् अङ्केषु निबद्धम्

(B) शृङ्गाररसप्रधानम् षष्ठाङ्के

(C) दुर्योधनेन जयद्रथस्य वधः

(D) मूलस्त्रोतं रामायणम्

136. याज्ञवल्क्यस्मृत्यनुसारं वादप्रतिवादसमये उभयपक्षानुमतः एकः धर्मवित् साक्षी भवितुमर्हति वा ?

(A) कदाचित्

(B) न कदापि

(C) सर्वदा

(D) उपर्युक्तेषु न किमपि

137. निर्णयसिन्धुः इति ग्रन्थस्य रचनाकारः कः ?

(A) पद्माकरभट्टः

(B) कमलाकरभट्टः

(C) कुसुमाकरभट्टः

(D) रत्नाकरभट्टः

138. निर्णयसिन्धुग्रन्थानुसारं एकमात्रसंक्रान्तिरहितः मासः किमिति उच्यते ?

(A) ज्येष्ठमासः

(B) कनिष्ठमासः

(C) मलमासः

(D) सत्यमासः

139. निर्णयसिन्धुः इति ग्रंथे विवाहस्य कति प्रकाराः कथिताः ?

(A) दश

(B) द्वादश

(C) अष्ट

(D) पञ्च

140. स्वस्थवृत्तस्य प्रयोजनं मुख्यरूपेण किमस्ति ?

(A) आयुवर्द्धनम्

(B) स्वस्थस्य स्वास्थ्यरक्षणम्

(C) प्राणरक्षणम्

(D) बुद्धिवर्धनम्

141. पाणिनीयशिक्षा इति ग्रन्थे कति स्वराः वर्णिताः ?

(A) विंशतिः

(B) एकविंशतिः

(C) त्रिषष्टिः

(D) चतुष्षष्टिः

142. अधोलिखितेषु पाठकगुणेषु पाणिनीयमते को न गण्यते ?

(A) अल्पकण्ठः

(B) अक्षरव्यक्तिः

(C) लयसामर्थ्यम्

(D) पदच्छेदः

**143.** पाणिन्यनुसारं मन्द्रं स्वरं कः जनयतिं ?

(A) गायत्रम्

(B) कण्ठः

(C) मारुतः

(D) उरस्

**144.** अधोलिखितेषु केषां संहिता संज्ञा विधीयते ?

(A) शब्दानाम्

(B) वर्णानाम्

(C) वाक्यानाम्

(D) सूत्राणाम्

**145.** शिवेहि इति प्रयोगे कः आदेशः ?

(A) पूर्वरूपम्

(B) पररूपम्

(C) गुणादेशः

(D) परसवर्णादेशः

**146.** रामायणविषये किं विशेषणं न प्रयुज्यते ?

(A) आदिकाव्यम्

(B) आर्षकाव्यम्

(C) अर्वाचीनकाव्यम्

(D) उपजीव्यकाव्यम्

**147.** 'सागरमन्थनम्' इति आख्यानं प्राप्यते

(A) किष्किन्धाकाण्डे

(B) अरण्यकाण्डे

(C) उत्तरकाण्डे

(D) बालकाण्डे

**148.** देशे देशे कलत्राणि देशे देशे च बान्धवाः।
तं तु देशं न पश्यामि यत्र भ्राता सहोदरः॥
श्लोकस्य वक्ताऽस्ति ?

(A) विभीषणः

(B) रामः

(C) सुग्रीवः

(D) लक्ष्मणः

**149.** 'कार्तवीर्य-उपाख्यानम्' – महाभारतस्य कस्मिन् पर्वणि विद्यते ?

(A) वनपर्वणि

(B) उद्योगपर्वणि

(C) शान्तिपर्वणि

(D) आश्वमेधिकपर्वणि

**150.** 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' – कथनं कस्य विषये प्रसिद्धम् ?

(A) महाभारतम्

(B) रामायणम्

(C) कादम्बरी

(D) श्रीमद्भागवतम्

रफ़ कार्य / ROUGH WORK

रफ़ कार्य / ROUGH WORK

## रफ़ कार्य / ROUGH WORK

SEAL